শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ১৭

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥श्रीमन्नारायणीयम् ॥

## দশক - ১৭

*ধ্রুৱচরিতৱর্ণনম্*

উত্তানপাদনৃপতের্মনুনন্দনস্য
জাযা বভূৱ সুরুচির্নিতরামভীষ্টা।
অন্যা সুনীতিরিতি ভর্তুরনাদৃতা সা
ত্বামেৱ নিত্যমগতিঃ শরণং গতাভূত্॥ ১॥

অঙ্কে পিতুস্সুরুচিপুত্রকমুত্তমং তং
দৃষ্ট্ৱা ধ্রুৱঃ কিল সুনীতিসুতোধিরোক্ষ্যন্।
আচিক্ষিপে কিল শিশুঃ সুতরাং সুরুচ্যা
দুস্সন্ত্যজা খলু ভৱদ্ৱিমুখৈরসূযা॥ ২॥

ত্বন্মোহিতে পিতরি পশ্যতি দারৱশ্যে
দূরং দুরুক্তিনিহতঃ স গতো নিজাম্বাম্।
সাপি স্বকর্মগতিসন্তরণায পুংসাং
ত্বত্পাদমেৱ শরণং শিশৱে শশংস॥ ৩॥

আকর্ণ্য সোপি ভৱদর্চননিশ্চিতাত্মা
মানী নিরেত্য নগরাত্ কিল পঞ্চৱর্ষঃ।
সন্দৃষ্টনারদনিৱেদিতমন্ত্রমার্গঃ
ত্বামারৰাধ তপসা মধুকাননান্তে॥ ৪॥

তাতে ৱিষণ্ণহৃদযে নগরীং গতেন
শ্রীনারদেন পরিসান্ত্বিতচিত্তৱৃত্তৌ।
বালস্ত্ৱদর্পিতমনাঃ ক্রমৱর্ধিতেন
নিন্যে কঠোরতপসা কিল পঞ্চমাসান্॥ ৫॥

তাৱত্তপোবলনিরুচ্ছ্ৱসিতে দিগন্তে
দেৱার্থিতস্তৱমুদযতকরুণার্দ্রচেতাঃ।
ত্বদ্রূপচিদ্রসনিলীনমতেঃ পুরস্তা-
দাৱির্বভূৱিথ ৱিভো গরুডাধিরূঢঃ॥ ৬ ॥

ত্বদ্দর্শনপ্রমদভারতরঙ্গিতং তং
দৃগভ্যাং নিমগ্নমিৱ রূপরসাযনে তে।
তুষ্টূষমাণমৱগম্য কপোলদেশে
সংস্পৃষ্টৱানসি দরেণ তথাদরেণ॥ ৭ ॥

তাৱদ্বিবোধৱিমলং প্রণুৱন্তমেন-
মাভাষথাস্তৱমৱগম্য তদীযভাৱম্।
রাজ্যং চিরং সমনুভূয ভজস্ব ভূযঃ
সর্ৱোত্তরং ধ্রুৱ পদং ৱিনিৱৃত্তিহীনম্॥ ৮ ॥

ইত্যূচিষি ত্বযি গতে নৃপনন্দনোসা-
ৱানন্দিতাখিলজনো নগরীমুপেতঃ।
রেমে চিরং ভৱদনুগ্রহপূর্ণকামঃ
তাতে গতে চ ৱনমাদৃতরাজ্যভারঃ॥ ৯ ॥

যক্ষেণ দেৱ নিহতে পুনরুত্তমেস্মিন
যক্ষৈঃ স যুদ্ধনিরতো ৱিরতো মনূক্ত্যা।
শান্ত্যা প্রসন্নহৃদযাদ্ধনদাদুপেতাত
ত্বদভক্তিমেৱ সুদৃঢামৱৃণোন্মহাত্মা॥ ১০ ॥

অন্তে ভৱতপুরুষনীতৱিমানযাতো
মাত্রা সমং ধ্রুৱপদে মুদিতোযমাস্তে।
এৱং স্বভৃত্যজনপালনলোলধীস্তৱং
ৱাতালযাধিপ নিরুন্ধি মমামযৌঘান্॥ ১১ ॥

**********



www.prapatti.com